मङ्गलाचरणम्

## ।।प्रथमोऽध्यायः ।।

**जयत्यब्जभवेशेन्द्रवन्दितः कमलापतिः ।**
**अनन्तविभवानन्दशक्तिज्ञानादिसद्गुणः ।। १ ।।**

१.वेदवेद्यशिष्यविरचिता-' तन्त्रसारविवृतिः'

**वे.टि.–** निरवधिगुणसिन्धुं सज्जनैकान्तवन्धुं स्मृतिहतभवबन्धं श्रीपतिं सत्यसन्धम्[१] (१.ट..ठ-बन्धम्) ।

सजलजलदकायं नित्यनिर्धूतमायं सकलसुरसहायं कृष्णमाराधयामि ।।

आनन्दतीर्थमुनिमादरतः प्रणम्य श्रीवादिराजयतिमन्वय[२] (२.ट.-अन्वथ) वेदवेद्यम् ।

सत्सम्प्रदायमविहाय विचार्य शास्त्रं सत्तन्त्रसारविवृतिं सरलां लिखामि ।।

अथ सकलसज्जनहितार्थमानन्दतीर्थमुनिः तन्त्रसारसङ्ग्रहं चिकीर्षुः निरन्तरायोऽपि शिष्यशिक्षायै श्रीहरेरुत्कर्षनिरूपणरूपं कृतमङ्गलं[३] (३.ट-उत्कर्षं निरूप्य ग्रन्थादौ मङ्गलं) निबध्नाति । **जयति** इति । कमलायाः श्रियः पतिः जयति उत्कृष्टो वर्तते । उत्कृष्टार्थजयतेरकर्मकत्वात् । जयेर्जयाभिभवयोराद्येऽर्थेऽसावकर्मकः इत्युक्तेः[४] (४.ट-इत्युक्तत्वात्) । उत्कर्षहेतुत्वेन विशेषणद्वयमाह - **अब्जभवेशेन्द्रवन्दित** इति । अब्जभवः ब्रह्मा, ईशो रुद्रः, इन्द्रः पुरन्दरः[५] (५.ट-इति । अ.) । अब्जभवश्च ईशश्च इन्द्रश्च अब्जभवेशेन्द्राः तैः वन्दितः स्तुतो नतश्च । वदि अभिवादनस्तुत्योरिति धातुव्याख्यानात् । अभ्यर्हितत्वात् अब्जभवपदस्य पूर्वनिपातः । **अनन्तविभवानन्दशक्तिज्ञानादिसद्गुणः** । अनन्ताः अपरिच्छिन्नाः विभवः ऐश्वर्यम् आनन्दः सुखं शक्तिः सामर्थ्यं ज्ञानञ्च आदिर्येषान्ते । सन्तो निर्दोषाः गुणाः शौर्यधैर्यबलभक्तवात्सल्यादयो यस्य स तथा ।।१।।

**श्रीवेङ्कटपत्याचार्यकृता टीका गुर्वर्थदीधितिः**

**श्रीमद्धनुमभीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीवेङ्कटेशाय[१]नमः ।।**

**गु.दी- हरिः ओम् ।।**(१ प्रा -लक्ष्मी वेङ्कटेशाय नमः, ज - श्रीगुरुभ्यो नमः)

सुजनमनोरथदानकामधेनू नृहरिचरणावभिष्टवीमि भक्त्या ।
यदुमुनिवरकृष्णयोश्च पादौ बहुमतिजयराजयोश्च सद्वन्द्यौ[२](२- वि जयराजपीड्यौ) ।। १

श्रीकृष्णपादाम्बुजषट्पदानहं गुरून् प्रपद्ये शरणं शरण्यान् ।।

विठ्ठलाचार्यवर्याख्यान् भूयो भूयो नमाम्यहम् ।

यत्पादस्मृतिमात्रेण मनो मे सम्प्रसीदति ।।

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितश्रीमत्तन्त्रसारसङ्ग्रहटीकायां विठ्ठाचार्यपुत्रेण श्रीनिवासविदुषा विरचितायां गूढार्थसङ्ग्रहव्याख्यायां चतुर्थोऽध्यायः ।।

।।श्रीकृष्णार्पणमस्तु।।

**ब.टि.–** ।। इति चतुर्थोऽध्यायः ।।

।। श्रीकृष्णार्पणमस्तु ।।

**मङ्गाली–** स्वस्वरूपककथनेन ग्रन्थसमाप्तिमरोचयमानः भगवन्माहात्म्य-मुपदर्शयन् प्रणमति– **अशेषेति** ।। अशेषदोषोज्झितश्चासौ पूर्णसद्गुणश्चेति विग्रहः। **सदा** सर्वदा, विशेषः परस्परप्रतियोगिकोत्कर्षरूपः अपगतो येभ्यः तानि रूपाणि यस्य तम्। आहिताग्न्यादित्वादपगतशब्दस्य परनिपातः। अन्योन्यं नीचोच्चत्वरहितानन्तरूपमिति भावः। 'सदा विशेषावगतोरुरूपम्' इति पाठे विशिष्यन्त इति विशेषाः विशिष्टाः रमाब्रह्मादयः, तैर्विशेषेण ज्ञानानन्दाद्य-परिमितविशेषवत्तयाऽवगतम्। उरु उत्कृष्टं पूर्णं वं उरुस्वरूपं येनेति वा तमित्यर्थः। **अप्रतीपं** अप्रतिद्वन्द्वं असदृशमिति यावत्। **प्रियेभ्यः** प्रीतिविषयेभ्यः देहादिसर्ववस्तुभ्यः सदा प्रियं नारायणमादरेण नमामीत्यशेषमतिमङ्गलम् ।

नरसिंहं रमानाथमनन्तगुणसागरम् ।
अशेषदोषविधुरं वन्दे मन्त्रार्थमुत्तमम् ।। १ ।।

मङ्गलधर्मपुरिणा श्रीजनार्दनसूनुना ।
यदकारि मया तेन तन्त्रसारार्थसङ्ग्रहः ।। २ ।।

यत्पुण्यं भावि तत्सर्वमवाप्नोतु गुरुर्मम ।
प्रीयतां तेन सर्वात्मा सज्जनानां हृदि स्थितः ।। ३ ।।

।। इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमत्तन्त्रसारस्य तत्तट्टीकाकारोक्तार्थसङ्ग्रहरूपायां मङ्गलीधर्माचार्यरचितायां

टीकायां चतुर्थोऽध्यायः ।।

।। श्रीकृष्णार्पणमस्तु ।।

**गू.टि.–** समापितग्रन्थो भगवानानन्दतीर्थमुनिः अन्तेऽपि स्वकृतं मङ्गलं शिष्यशिक्षायै निबध्नाति –अशेषेति । अवगतम्[136](१३६.र-विशेषेण अवगतम् । अ.) उत्कृष्टं स्वरूपं येन सः तयोक्तम् ।